# ॥ श्रीराधास्तोत्रं उद्धवकृतम् ॥

## ॥ अथ उद्धवकृतं श्रीराधास्तोत्रम्॥

उद्धव उवाच

वन्दे राधापदाम्भोजं, ब्रह्मादिसुरवन्दितम् ।
यत्कीर्तिकीर्तनेनैव, पुनाति भुवनत्रयम् ॥ 1॥

नमो गोकुलवासिन्यै, राधिकायै नमो नमः ।
शतशृङ्गनिवासिन्यै, चन्द्रावत्यै नमो नमः ॥ 2॥

# ॥ श्रीराधास्तोत्रं उद्धवकृतम् ॥

तुलसीवनवासिन्यै, वृन्दारण्यै नमो नमः ।
रासमण्डलवासिन्यै, रासेश्वर्यै नमो नमः ॥ 3 ॥

विरजातीरवासिन्यै, वृन्दायै च नमो नमः ।
वृन्दावनविलासिन्यै, कृष्णायै च नमो नमः ॥ 4 ॥

नमः(ख्) कृष्णप्रियायै च, शान्तायै च नमो नमः ।
कृष्णवक्षःस्थितायै च, तत्प्रियायै नमो नमः ॥ 5॥

नमो वैकुण्ठवासिन्यै, महालक्ष्म्यै नमो नमः ।
विद्याधिष्ठातृदेव्यै च, सरस्वत्यै नमो नमः ॥ 6॥

# ॥ श्रीराधास्तोत्रं उद्धवकृतम् ॥

सर्वैश्वर्याधिदेव्यै च, कमलायै नमो नमः ।
पद्मनाभप्रियायै च, पद्मायै च नमो नमः ॥ 7॥

महाविष्णोश्च मात्रे च, पराद्यायै नमो नमः ।
नमः(स्) सिन्धुसुतायै च, मर्त्यलक्ष्म्यै नमो नमः ॥ 8॥

नारायणप्रियायै च, नारायण्यै नमो नमः ।
नमोऽस्तु विष्णुमायायै, वैष्णव्यै च नमो नमः ॥ 9 ॥

महामायास्वरूपायै, सम्पदायै नमो नमः ।
नमः(ख्) कल्याणरूपिण्यै, शुभायै च नमो नमः ॥ 10 ॥

# ॥ श्रीराधास्तोत्रं उद्धवकृतम् ॥

मात्रे चतुर्णां वेदानां, सावित्र्यै च नमो नमः ।
नमो दुर्गविनाशिन्यै, दुर्गादिव्यै नमो नमः ॥ 11॥

तेजःसु सर्वदेवानां, पुरा कृतयुगे मुदा ।
अधिष्ठानकृतायै च, प्रकृत्यै च नमो नमः ॥ 12॥

नमस्त्रिपुरहारिण्यै, त्रिपुरायै नमो नमः ।
सुन्दरीषु च रम्यायै, निर्गुणायै नमो नमः ॥ 13 ॥

नमो निद्रास्वरूपायै, निर्गुणायै नमो नमः ।
नमो दक्षसुतायै च, नमः सत्यै नमो नमः ॥ 14 ॥

# ॥ श्रीराधास्तोत्रं उद्धवकृतम् ॥

नमः(श्) शैलसुतायै च, पार्वत्यै च नमो नमः ।
नमो नमस्तपस्विन्यै, ह्युमायै च नमो नमः ॥ 15 ॥

निराहारस्वरूपायै, ह्यपर्णायै नमो नमः ।
गौरीलोकविलासिन्यै, नमो गौर्यै नमो नमः ॥ 16 ॥

नमः(ख्) कैलासवासिन्यै, माहेश्वर्यै नमो नमः ।
निद्रायै च दयायै च, श्रद्धायै च नमो नमः ॥ 17 ॥

नमो धृत्यै क्षमायै च, लज्जायै च नमो नमः ।
तृष्णायै क्षुत्स्वरूपायै, स्थितिकर्त्र्यै नमो नमः ॥ 18 ॥

# ॥ श्रीराधास्तोत्रं उद्धवकृतम् ॥

नमः(स्) संहाररूपिण्यै, महामायै नमो नमः ।
भयायै चाभयायै च, मुक्तिदायै नमो नमः ॥ 19 ॥

नमः(स्) स्वधायै स्वाहायै, शान्त्यै कान्त्यै नमो नमः ।
नमस्तुष्ट्यै च पुष्ट्यै च, दयायै च नमो नमः ॥ 20 ॥

# ॥ श्रीराधास्तोत्रं उद्धवकृतम् ॥

नमो निद्रास्वरूपायै, श्रद्धायै च नमो नमः ।
क्षुत्पिपासास्वरूपायै, लज्जायै च नमो नमः ॥ 21॥

नमो धृत्यै क्षमायै च, चेतनायै च नमो नमः ।
सर्वशक्तिस्वरूपिण्यै, सर्वमात्रे नमो नमः ॥ 22॥

# ॥ श्रीराधास्तोत्रं उद्धवकृतम् ॥

अग्नौ दाहस्वरूपायै, भद्रायै च नमो नमः ।
शोभायै पूर्णचन्द्रे च, शरत्पद्मे नमो नमः ॥ 23 ॥

नास्ति भेदो यथा देवि, दुग्धधावल्ययोः(स्) सदा ।
यथैव गन्धभूम्योश्च, यथैव जलशैत्ययोः ॥ 24 ॥

यथैव शब्दनभसोर्-ज्योतिः(स्) सूर्यकयोर्तथा ।
लोके वेदे पुराणे च, राधामाधवयोस्तथा ॥ 25॥

चेतनं(ङ्) कुरु कल्याणि, देहि मामुत्तरं सति ।
इत्युक्त्वा चोद्धवस्तत्र, प्रणनाम पुनः पुनः ॥ 26॥

## ॥ श्रीराधास्तोत्रं उद्धवकृतम् ॥

इत्युद्धवकृतं स्तोत्रं, यः(फ्) पठेद् भक्ति पूर्वकम् ।
इह लोके सुखं भुक्त्वा, यात्यन्ते हरिमन्दिरम् ॥ 27॥

न भवेद् बन्धुविच्छेदो, रोगः(श्) शोकः(स्) सुदारुणः ।
प्रोषिता स्त्री लभेत् कान्तं, भार्याभेदी लभेत् प्रियाम् ॥ 28॥

## ॥ श्रीराधास्तोत्रं उद्धवकृतम् ॥

अपुत्रो लभते पुत्रान्, निर्धनो लभते धनम् ।
निर्भूमिर्लभते भूमिं, प्रजाहीनो लभेत् प्रजाम् ॥ 29॥

रोगाद् विमुच्यते रोगी, बद्धो मुच्येत बन्धनात् ।
भयान्मुच्येत भीतस्तु, मुच्येतापन्न आपदः ॥ 30॥

अस्पष्टकीर्तिः(स्) सुयशा, मूर्खो भवति पण्डितः ॥ 31॥

इति श्रीब्रह्मवैवर्ते उद्धवकृतं श्रीराधास्तोत्रं सम्पूर्णम्॥